# শ্রীমজ্জগদ্গুরুশঙ্করাচার্যপদাবলম্বনস্তুতী

{॥ শ্রীমজ্জগদ্গুরুশঙ্করাচার্যপদাবলম্বনস্তুতী ॥}

ওমিত্যশেষবিবুধাঃ শিরসা যদাজ্ঞাং

সম্বিভ্রতে সুমমযীমিব নব্যমালাম্ ।

ওঙ্কারজাপরতলভ্যপদাব্জ স ত্বং

শ্রীশঙ্করার্য মম দেহি পদাবলম্বম্ ॥ ১॥

নম্রালিহৃত্তিমিরচণ্ডমযূখমালিন্

কম্রস্মিতাপহৃতকুন্দসুধাংশুদর্প ।

সম্রাড্যদীযদযযা প্রভবেদ্দরিদ্রঃ

শ্রীশঙ্করার্য মম দেহি পদাবলম্বম্ ॥ ২॥

মন্তে দুরক্ষরততির্লিখিতা বিধাত্রা

জাগর্তু সাধ্বসলবোঽপি ন মেঽস্তি তস্যাঃ ।

লুম্পামি তে করুণযা করুণাম্বুধে তাং

শ্রীশঙ্করার্য মম দেহি পদাবলম্বম্ ॥ ৩॥

শম্পালতাসদৃশভাস্বরদেহযুক্ত

সম্পাদযাম্যখিলশাস্ত্রধিযং কদা বা ।

শঙ্কানিবারণপটো নমতাং নরাণাং

শ্রীশঙ্করার্য মম দেহি পদাবলম্বম্ ॥ ৪॥

কন্দর্পদর্পদলনং কিতবৈরগম্যং

কারুণ্যজন্মভবনং কৃতসর্বরক্ষম্ ।

কীনাশভীতিহরণং শ্রিতবানহং ত্বাং

শ্রীশঙ্করার্য মম দেহি পদাবলম্বম্ ॥ ৫॥

রাকাসুধাকরসমানমুখপ্রসর্প-

দ্বেদাংতবাক্যসুধযা ভবতাপতপ্তম্ ।

সংসিচ্য মাং করুণযা গুরুরাজ শীঘ্রং

শ্রীশঙ্করার্য মম দেহি পদাবলম্বম্ ॥ ৬॥

যত্নং বিনা মধুসুধাসুরদীর্ঘকাব-

ধীরিণ্য আশু বৃণ(ণু)তে স্বযমেব বাচঃ ।

তং ত্বৎপদাব্জযুগলং বিভৃতে হৃদা যঃ

শ্রীশঙ্করার্য মম দেহি পদাবলম্বম্ ॥ ৭॥

শ্রীশঙ্করার্যকরুণাবশতঃ প্রণীতং

স্তোত্রং তদীযমনুবর্ণযুতং তদঙ্ঘ্র্যোঃ ।

ভক্ত্যা সমর্পিতমিদং পঠতাং নরাণাং

বিদ্যাবিরক্তিমতুলাং গুরুরাট্ তনোতু ॥ ৮॥

ইতি শ্রীচন্দ্রশেখরভারতীমহাস্বমিভিঃ বিরচিতম্

আচার্যপদাবলম্বনস্তুতিঃ সম্পূর্ণং ।

*Stotram Digitalized By Sanskritdocuments.org*

Encoded and proofread by Ramakrishna Upadrasta uramakrishna at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Sri Shankaracharya Padavalambana Stuti Lyrics in Bengali PDF
% File name : shankarAchAryapadAvalambanastuti.itx
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : hinduism
% Transliterated by : Ramakrishna Upadrasta uramakrishna at gmail.com
% Proofread by : Ramakrishna Upadrasta
% Latest update : May 18, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website